रेविता-त्री, रेवयिता-त्री, रिरेविषिता-त्री, रेरेविता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि। [1]रेवः-रेवा, [2]रेवणः इमानि अधिकान्यत्रेति विशेषः ।

## (1442) "रेषृ अव्यक्ते शब्दे"

(I-भ्वादिः-620. अक. सेट्. आत्म.)

धातुममुं क्षीरस्वामी चन्द्रसम्मतत्वेन पठति। अयं स्वभावाद् वृकध्वनौ वर्तते।

रेषकः-षिका, रेषकः-षिका, रिरेषिषकः-षिका, रेरेषकः-षिका ;

रेषिता-त्री, रेषयिता-त्री, रिरेषिषिता-त्री, रेरेषिता-त्री ;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगेपतिवत् (429) बोध्यानि। [3]रेषणः, [4]रेषा, [A]रेषः, क्विपि-रेट्-रेड्-रेषौ-रेषः इत्यस्य विशेषः।

## (1443) "रै शब्दे" (I-भ्वादिः-909. अक. अनि. पर.)

'रै शब्दे रायतीतीष्टं राऽऽदाने राति शब्लुकि ॥' (श्लो. 11) इति देवः।

रायकः-यिका, रापकः-पिका, रिरासकः-सिका, रारायकः-यिका ;

राता-रात्री, रापयिता-त्री, रिरासिता-त्री, रारायिता-त्री ;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककायतिवत् (263) बोध्यानि।

---

1. अचि प्रत्यये रेवः इति रूपम्। स्त्रियाम् अजादिपाठात् 'अजाद्यतष्टाप्' (4-1-4) इति टापि रेवा इति। रेवा = नर्मदा।
2. 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति, 'अनुदात्तेतश्च हलादेः' (3-2-149) इति वा युचि रूपमेवम्।
3. 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति ताच्छीलिको युच्प्रत्ययः।
4. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः। रेषा = वृकरवः। तदुक्तं केशवस्वामिना—"कौक्षे कर्दति, पर्दते गुदरवे, रेषेति वार्के भवेद्, बुक्केति श्वरवे भषेति, हयजे हेषेति हेषेति च।" इति मा. धा. वृत्तिः।

A. 'सुप्रेषितान् पथि सरेषवृके सहेषं हेषास्तकासरमदान् अतिभासुराज्ञान्।'

धा. का. 1-79.